© 2017 IJSRST | Volume 3 | Issue 1 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
Themed Section: Science and Technology

# संस्कृतवाङमये मुक्तककाव्यतत्वानि

शीतला प्रसाद तिवारी
शोधच्छात्रः
राष्ट्रियसंस्कृतसंस्थानम्
गङ्गानाथपरिसरः
चन्द्रशेखराजादोद्यानम् इलाहाबादः

यत्र काव्ये रसचर्वणायाः कृते पूर्वापरस्य पद्यस्य अपेक्षा न भवति स मुक्तककाव्यं कथ्यते मुक्तककाव्ये प्रत्येकं पद्यं एकाकी एव रसोद्बोधकत्वं कर्तुं शक्नोति यथा अमरूकशतकस्य पद्यानि, नीतिशतकस्य पद्यानि इत्यादीनि। परन्तु महाकाव्यखण्डकाव्यादिषु प्रबन्धेषु एकं पद्यं रसोद्बोधकार्थं पूर्वं परं वा पद्यमपेक्षते– यथा कुमारसम्भवमित्यादिषु काव्येषु। यद्यपि मुक्तककाव्येषु रसचर्वणायाः कृते पूर्वापरस्य अपेक्षा न भवति तथापि तथापि पद्यानां विषयवस्तुदृष्ट्या पार्थक्यं न भवति यथा नीतिशतकस्य प्रत्येकं पद्यानि स्वतन्त्ररूपेण रसचर्वणां कारयति तथापि तेषां वर्ण्यविषयः प्रायः नीतिरेव अस्ति। अतः विषयवस्तुदृष्ट्या शैलीदृष्ट्या च अन्यदृष्ट्या अपि पद्यानां मध्ये अन्तर्सम्बन्धता भवति एव ।

प्राचीनसंस्कृतवाङमयमतिसमृद्धमस्ति अस्मिन् प्रायः साहित्यस्य प्रत्येकं विधायाः तत्त्वानि अन्तर्निहितानि सन्ति यानि अग्रे गत्वा पृथक्–पृथक् रूपेण विकासं समवाप्नुवन्। समकालिकसंस्कृतकाव्यकर्मणि मुक्तकानां प्राधान्यं विद्यते कतिपयाः विद्वान्सः 'मुक्तकम्' आधुनिकविधा कथयन्ति वस्तुतः मुक्तकमाधुनिकी विधा तु अस्ति एव, परञ्च अस्य तत्वानि प्राचीन –संस्कृतवाङमये प्राचुर्येण प्राप्यते। अस्मिन् लेखे ऋग्वेदारभ्य कालिदासपर्यन्तं मुक्तकतत्वानामन्वेषण तद्विकासः च मया अन्वेषितः वर्तते।

साहित्यस्यसंस्कृतवाङ्मये मुक्तककाव्यपरम्परा अतिप्राचीना अस्ति। अस्याः तत्त्वानि ऋग्वेदेऽपि प्राप्यन्ते। यदपि ऋग्वेदस्य रचना सूक्तेषु कृता अस्ति प्रत्येकं सूक्तञ्च देवविशेषं विषयविशेषं वा वर्णयति। अनया दृष्ट्या सूक्तानाम् ऋचः मुक्तकपद्यानि भवितुं नार्हन्ति तदपि अनेकासु ऋचासु पूर्वापरनिरपेक्षेणापि रसचर्वणा भवति यथा–

**एषा शुभ्रा न तन्वो विदानो ध्र्वेव स्नाती दृशये नो अस्थात्।**
**अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात्।**[1]

द्युलोकस्य पुत्री उषा लावण्यमयी नारीव स्नात्वा ऊर्ध्वं गच्छन्ती शुभ्रं देहं प्रकटयन्ती अन्धकारशत्रुं दूरमपसारयन्ती स्वमनोहरतेजसा सह समागताऽस्ति। संहितानाम् अनेके प्रसङ्गाः पाश्चात्यालोचकैः ग्राम्यगीतसंज्ञया विभूषितास्सन्ति। एतासु गीतिषु आध्यात्मिकभावो गीतिकाव्यस्य वैशिष्ट्यञ्च उभावपि दृश्येते। अत्र वैदिकऋषिभिः जीवनस्य जगतश्च विषये स्वमनोभावाः सरागमभिव्यक्ताः। अक्षकितवसूक्तस्य अधोलिखिता ऋचा दृश्यताम्–

**नीचा वर्तन्त उपरि स्फुरन्त्य हस्तासो हस्तवन्तं सहन्ते**
**दिव्या अङ्गारा इरिणे न्युप्ताः शीताः सन्तो हृदयं निर्दहन्ति ।**[2]

यद्यपि इमे अक्षाः अधःस्थले वर्तन्ते तथापि उपरि स्फुरन्ति, अहस्तवन्तोऽपि हस्तवतः मनुष्यान् वशीकुर्वन्ति, शीताः सन्तोऽपि इमे दिव्या अग्निकणाः हृदयान् दग्धीकुर्वन्ति। अनेन प्रकारेण इयं ऋक् दृश्यताम् यस्यां व्याधिपीडितस्य कस्यचित् मनुष्यस्य करुणदशायाः चित्रणमस्ति व्याधिपीडितः कथयति यत् यथा वृकः पिपासुमृगं खादति तथैव व्याधिः माम्।

**अहं सो अस्मि यः पुरा सुते वदामि कानि चित्**
**तं मो व्यन्त्याध्यो३ वृको न तृष्णजं मृगं।**[3]

संहितासु गेयताः छन्दोविधानानि मनोभावानामभिव्यक्तयश्च प्राप्यन्ते कालान्तरे इमानि तत्त्वानि एव आश्रित्य मुक्तककाव्यं विकसितमभवत्। संहितासु न केवलं माधुर्यं प्राप्यते अपितु पर्जन्यस्य मरुतश्च प्रसङ्गे गाढबन्धस्य ओजसश्चापि निर्वाहोऽपि दृश्यते। अतः वैदिकऋक्षु मुक्तककाव्यस्य सुदृढाधारभूमिः विन्यस्ताऽस्ति। रामायणे महाभारते च अनेकेषु स्थलेषु प्रकृतिचित्रणानि मनोभावानां चित्रणानि नीतिवचनानीत्यादीनि मुक्तककाव्यस्य आधारतत्त्वानि प्राप्यन्ते। अनन्तरं बौद्धवाङ्मयस्यापि मुक्तककाव्यपरम्परायां महनीयं योगदानं विद्यते। बौद्धसाहित्यस्य 'थेरगाथा' 'थेरीगाथा' च इति रचनाद्वयं मुक्तककाव्यपरम्परायां विशेषरूपेण उल्लेख्यमस्ति। 'थेरगाथा' खुद्दकनिकायस्य

पञ्चदशसु रचनासु एका रचनास्ति। 'थेर' इति पदस्य अर्थः 'स्थविरः' 'बौद्धभिक्षुः' वा भवति। थेरगाथायाम् १२७६ पद्यानि सन्ति। एतेषां पद्यानां रचना महात्मबुद्धस्य संघनिर्माणकालादेव जायमाना आसीत्। संघस्य भिक्षुभिः अनुश्रुतिमाध्यमेन एतेषां पद्यानां परिरक्षणं कतिपयशताब्दीं यावत् कृतम्। यद्यपि गाथासु प्रायेण निर्वाणप्राप्तानामनासक्तानां सिद्धानामुद्गाराः प्राप्यन्ते तथापि एषु उद्गारेषु जगतः सौन्दर्यमपि वर्णितमस्ति। अस्मिन् वर्णने काचित् क्षुद्रभावना देहासक्तिर्वा न विद्यते परञ्च प्रकृतेः सुषमां प्रति सहजाकर्षणमस्ति। एतादृशे आकर्षणे उदात्तमूल्यबोधोऽन्तर्निहितोऽस्ति यथा–

**नीलब्भवण्णा रुचिरा सीतवारी सुचिन्धरा**
**इन्द गोपकस छन्ना ते सेला रमयन्ति माम्।**[4]

अर्थात् नीलाभवर्णा रुचिराः शीतजलैः परिपूर्णा इन्द्रगोपिभिराच्छादिताः पर्वता मां रमयन्ति।

**धरणी च सिञ्चति वाति मालूतो विज्जुता चरति नभे**
**उपसम्मन्ति वितक्का चित्त सुसमाहितं मम।** [5]

अर्थात् वर्षाजलं धरणीं सिञ्चति, पवनो वाति आकाशे च चपला दृश्यते। परञ्च मम मनसि वितर्काः शान्तिमाप्नुवन्ति मम चित्तं सुसमाहितमस्ति।

**प्राकृतगाथा मुक्तकपरम्परा च**

प्राकृतगाथायां 'गाहासतसई' विशेषरूपेणोल्लेखनीयास्ति अस्यां गृहस्य परिवारस्य ग्राम्यजीवनस्य च साधारणघटनाः सौन्दर्यपूर्वकं वर्णिताः सन्ति। प्राकृतगाथायाः प्रभावः कवेः अमरूकस्योपरि स्फुटरूपेण दृश्यते। अस्याः गाथायाः कानिचित् पद्यानि दृश्यन्ताम्।

**अमयमअ गअणसेहर रअणीमुहतिलअ चन्द हे छिबसु**
**छित्तो जोहि पिअवमो ममं तेहि विअ करेंहि।**[6]

संस्कृतच्छाया अस्ति।

**अमृतमय गगनशेखर रजनीमुखतिलक चन्द्र हे स्पृश**
**स्पृष्टो यैः प्रियतमो मामपि तैरेव करैः।**

एवमेव अन्यायां गाथायां नायिका कथयति।

**एहिह सा वि पउत्थो अहं च कुप्पेज्ज सो वि अणुणेज्ज**
**इअ कस्स कि फलइ मनोरहाणं माला पिअअमम्मि।**[7]

अमरूकविः उपर्युक्तं भावमनेन प्रकारेण अभिव्यनक्ति।

**भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते**
**रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते**
**कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते**
**दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने।** [8]

अर्थात् प्रियतमे प्रत्यक्षे समागते मानस्य निर्वहणं न सम्भवति। वस्तुतः गाहासतसई–काव्यस्य मुक्तकेषु प्रणयजीवनस्य अन्तरङ्गस्थितीनां सूक्ष्मपर्यवेक्षणमनुभूतिपरञ्च चित्रणमस्ति। अनेन प्रकारेण पालिगाथायाः सुकुमारभावभूम्या संस्कृतमुक्तककाव्यमुपकृतमभवत्। संस्कृतसाहित्यस्य छन्दोवैभवेन पालिप्राकृतगाथापि उपकृता अभूत्। संस्कृतसाहित्यस्य प्राकृतगाथायाश्च संगमो महाकविकालिदासस्य ऋतुसंहारे दृश्यते।

**मुक्तकपरम्परायां महाकविकालिदासस्य अवदानम्**

महाकविकालिदासस्य ऋतुसंहारं मुक्तकपरम्परायां समायाति अस्मिन् ग्रीष्मः वर्षा शरद् हेमन्तः शिशिरः वसन्तश्चेति षड्ऋतूनां वर्णनमस्ति । ऋतुसंहारं कालिदासस्य प्रथमा रचनास्ति । अस्मिन् ऋतुवर्णनैः सह कामिजनानां विलासोऽपि वर्णितोऽस्ति। प्रायः पद्यानि प्रियां प्रति निवेदितानि सन्ति। अस्मिन् प्रकृतिः उद्दीपकरूपेण चित्रितास्ति। ऋतुपरिवर्तने प्रकृतौ किं परिवर्तनं भवति। परिवर्तनस्य मनसि कः प्रभाव आपतति विशेषरूपेण सहृदयानां मनःसु इत्यादयः ऋतुसंहारस्य वर्ण्यविषयाः सन्ति। यथा अधोलिखिते पद्ये वसन्तचित्रणं कामोद्दीपकरूपेण कृ तमस्ति।

**द्रुमाः सपुष्पाः सलिलं सपद्मं स्त्रियः सकामाः पवनः सुगन्धिः**
**सुखाः प्रदोषाः दिवसाश्च रम्याः सर्वं प्रिये चारुतरं वसन्ते।**[9]

ऋतुसंहारं प्रसादगुणपूर्णमस्ति पद्यानामर्थाऽवगमः प्रायः सारल्येन भवति। गीष्मवर्षावर्णने ओजोगुणोऽपि प्राप्यते यथा–

**ससीकराम्भोधरमत्तकुञ्जरस्तडित्पताकाशनिशब्दमर्दलः**
**समागतो राजवदुद्धतद्युतिर्घनागमः कामिजनप्रियः प्रिये।**[10]

शरदर्तोः वर्णने कविकल्पना दर्शनीया वर्तते।

**काशांशुका विकचपद्ममनोज्ञवक्त्रा सोन्मादहंसरवनूपुरनादरम्या**
**आपक्वशालिरुचिरानतगात्रयष्टिः प्राप्ता शरन्नववधूरिव रूपरम्या।**[11]

कविना अत्र रूपक–उत्प्रेक्षा–उपमानामुत्कृष्टा संसृष्टिः प्रस्तुतास्ति। कवेः वर्णननैपुण्यं कल्पना च मिलित्वा साधारणकथ्यम् असाधारणीकुरुतः। इदमेव ऋतुसंहारस्य वैशिष्ट्यमस्ति।

सन्दर्भग्रन्थाः–
अमरूकशतकम् –अमरूकविः
सम्पादकः–श्रीकृष्णदासः
प्रकाशकः–मित्रप्रकाशनम् प्राइवेटलिमिटेड इलाहाबाद।

ऋतुसंहारम् महाकविः कालिदासः सम्पादकः –शिवप्रसादद्विवेदी प्रकाशकः–चौखम्भासुरभारतीप्रकाशनम् वर्ष २०१२
गाहासत्तसई– हाल हिन्दी अनुवादक–हरिराम आचार्य , प्रकाशकः–जयपुर प्राकृत भारती अकदमी १६८६
संस्कृतसाहित्य का इतिहास डा० लेखक राधा वल्लभत्रिपाठी सम्पादक– आचार्य बलदेवोपाध्याय प्रकाशक –उत्तरप्रदेशसंस्कृतसंस्थान लखनऊ।

**सन्दर्भग्रन्थः**

1 ऋग्वेदः ५/८०/५
2 ऋग्वेदः १०/३४/६
3 ऋग्वेदः १/१०५/६
4 वनवच्छथेरो १६
5 विमलोथेरो गाथा ५३
6 गाहासत्तसई १/१६
7 गाहासत्तसई १/१७
8 अमरूशतकम् पद्यसंख्या २८
9 ऋतुसंहारम्६.२
10 ऋतुसंहारम् २.१
11 ऋतुसंहारम्३.१